# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

## ब्रह्मचारिणा मनोमयेन अनूदितम्

'राखालः' इति श्रवणेन भावाविष्टः ठाकुरः गदगदस्वरेण उदचारयत्— 'तन्नाम, राखालः- व्रजस्य राखालः'। अपरं किञ्चित् प्रकृतिस्थः भूत्वा सादरेण अवदत् 'पुनः आगच्छतात्'।

इतः प्रथमदर्शनेन एव राखालस्य अन्तःकरणे विद्युत्प्रकाशः इव कश्चन उच्छ्वासः प्रावहत्— तस्य देहमनःप्राणाः सर्वे एककालम् इमं परमपुरुषं प्रति निविडावेशेन आकृष्टाः अभवन्। सः मनसा चिन्तयामास— "एषः कः? एषः सौम्यः महापुरुषः कः? अस्य अनिमेषदृष्टौ यत् दैवं माधुर्यं प्रवहति, तद् इहलौकिकं न, अस्य नयनसमीपे निश्चयेनैव तत् नित्यसत्यवस्तु सदा विद्यमानं वर्तते।" **मार्गेण गच्छतः राखालस्य कर्णाभ्यां सा कोमला वाणी ध्वनिता भवति स्म, "पुनः आगच्छतात्।"**

प्रेमघनमूर्तेः श्रीरामकृष्णस्य अपूर्वाकर्षणेन राखालः पुनः दक्षिणेश्वरं गन्तुं अवकाशम् अन्विषति स्म, किञ्च विद्यालयावसानात् परम् एकस्मिन् दिने एकाकी तत्र उपस्थितोऽभूत्। श्रीरामकृष्णं दृष्ट्वैव मनसि भातं यथा तस्यागमनार्थमेव सः प्रतीक्षमाणः इव— राखालस्य आगमनेन एव सानुयोगेन अगदत्— 'तव अत्रागमनार्थम् एतावान् विलम्बः कुतः?' इति। राखालः किं वा वदेत्? उभौ तदा उभयम् अनिमिलितचक्षुर्भ्यां पश्यन्तौ एकस्याम् अलौकिकीभावभूमौ उपस्थितौ लीलाविलासे मग्नौ आस्ताम्— वाचा तदा उत्तरं कः प्रयच्छेत्? मातृहीनः राखालः भावघनतनुं श्रीरामकृष्णं स्वजननीरूपेण प्राप्नोत्, किञ्च यद्यपि राखालः युवकः आसीत् तथापि श्रीरामकृष्णः तं शिशुत्वेन परिगणितवान्। ततः परं राखालः प्रायः दक्षिणेश्वरम् आगच्छति स्म, मध्ये मध्ये तत्र निवसति स्म च। अस्मिन् काले या अपूर्वलीला संघटिता तद् वर्णयन् श्रीरामकृष्णः अवदत्— 'तदा राखालस्य भावः त्रिचतुरवर्षीयः बालकः इव आसीत्। मातरम् इव माम् अङ्गीकृतवान्। मध्ये मध्ये हठात् धावन् आगत्य मत्क्रोडे उपविश्य सानन्देन निःसङ्कोचं स्तन्यपानं करोति स्म। गृहस्य का कथा— इतः क्वापि सः न गन्तुम् इच्छति। मां लब्ध्वा आत्मानं विस्मरतः राखालस्य अन्तः कथं बालकभावस्य आवेशः भवति स्म तद्वाचा वर्णयितुं न शक्यते। तदा यः कोऽपि तम् एवम् अपश्यत् सः एव व्यस्मयत। अहमपि भावाविष्टः सन् तं क्षीरनवनीतादिकम् अखादयम्। क्रीडनकादिकं च प्रादाम्। बहुवारं स्कन्धे उपावेशयम्। तदा तस्य सङ्कोचस्य लेशः अपि नाभवत्।'

एकस्मिन् दिवसे राखालस्य विषये ठाकुरः उक्तवान्, 'राखालस्य साकारभावः नरेन्द्रस्य निराकारभावः।' यदा राखालः प्रथमं दक्षिणेश्वरम् आगतवान्, तदा नरेन्द्रनाथेन सह ब्राह्मसमाजं गच्छति स्म सः, किञ्च तस्य प्रेरणया समाजस्य प्रतिज्ञापत्रे स्वाक्षरम् अपि कृतवान्। तदनुसारेण मूर्तिपूजनं, किंवा देवीदेवेभ्यः प्रणामनिवेदनं च तस्य वर्जितम् आसीत्। श्रीरामकृष्णस्य संस्पर्शेन सः तत् सर्वं शिक्षितवान्, किञ्च तदेव तस्य स्वभावानुरूपम् अभवत् इति कृत्वा तत्रैव आनन्दम् अन्वभवत्। राखालस्य दक्षिणेश्वरागमनात् केभ्यश्चित् मासेभ्यः परमेव नरेन्द्रः दक्षिणेश्वरम् आगच्छत्, पुनः स्वल्पदिनाभ्यन्तरे एव राखालस्य परिवर्तनं परिलक्ष्य ठाकुरस्य अप्रत्यक्षं तं कपटचारिणम् उक्त्वा कर्कशभाषया अभर्त्सयत्। कोमलप्रकृतिः राखालः नरेन्द्रनाथम् अनुसरति स्म, किञ्च तेन सह वादं न कुरुते स्म। सुतराम् अस्याः घटनायाः परं सः नरेन्द्रनाथस्य समीपं नागच्छत्। ठाकुरः इदं परिलक्ष्य अनुसन्धानं कृत्वा कारणमपि ज्ञातवान्। तदा नरेन्द्रनाथम् उक्तवान्, 'भोः, राखालं पुनः किमपि न वद,

सः त्वत् बिभेति। तस्येदानीं साकारे विश्वासोऽभवत्— किं वा स कुर्यात् सम्प्रति कथय? सर्वे किं प्रथमतः निराकारसाधनां कर्तुं शक्नुवन्ति?' अस्मिन् समये एकद्युः वैष्णवमहाजनानां पदावलीकीर्तनं श्रृण्वन् ठाकुरः शरीरस्य आवरणम् अच्छिनत्, पुनः तस्य अश्रु-पुलक-कम्पनादि प्रकटितम् अभवत्। महता भावेन सः अवदत्, 'प्राणनाथं हृदयवल्लभं कृष्णं कृपया अत्र आनयत यूयं, सुहृदः कर्म एतत्। तम् आनयत नो चेत् मां तत्र नय—युष्माकं चिरदासी भविष्यामि।' राखालः अपलकदृष्ट्या तं भावं दृष्टवान्। साग्रहमनसा तस्याः आर्तेः अनुधावनं कृतवान्—ज्ञातवान् यत्, साकारोपासनं स्वीकृत्य नरेन्द्रः यत्किमपि वदतु नाम, साकारस्य श्रीकृष्णस्य प्रेमसम्भूतस्य अस्य सात्त्विकविकारस्य भित्तिरूपं यत् सत्यं वर्तते, तत् युक्तितर्कातीतम्।



[बेलुडमठे ब्रह्मानन्दस्वामिविग्रहस्य श्रीकृष्णविग्रहस्य च चित्रम्]